International Journal of Sanskrit Research 2022; 8(1): 219-223

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 219-223
© 2022 IJSR
www.anantaajournal.com
Received: 24-11-2021
Accepted: 26-12-2021

**समीरणः रायः**
सहकारी अध्यापकः संस्कृतविभागः,
गुसकरा महाविद्यालयः
पूर्ववर्धमानः, पश्चिमबङ्गः, भारत

**Corresponding Author:**
**समीरणः रायः**
सहकारी अध्यापकः संस्कृतविभागः,
गुसकरा महाविद्यालयः
पूर्ववर्धमानः, पश्चिमबङ्गः, भारत

# मधुसूदनसरस्वतीप्रणीते कृष्णकुतूहलनाटके श्रीकृष्णः

**समीरणः रायः**

**शोधसारः**
गौडीयवैष्णवसाहित्ये मधुसूदनसरस्वत्या एकं विशिष्टमवदानं वर्तते। प्रख्यातपण्डितो दार्शनिकः परमभक्तः सन्न्यासी श्रीमधुसूदनसरस्वती बांलादेशे फरिदपुरजिलान्तर्गते कोटालिपाडापरगणास्थिते ऊनशिया इति ग्रामे अजायत। ईशवीयः षोडश-सप्तदशशतकः तस्य समयकालः। सर्वतन्त्रपारङ्गमस्य तस्य मातुर्नाम अरुन्धतीदेवी पिता च प्रमोदन-पुरन्दराचार्य-नारायणः। सन्न्यासग्रहणात्पूर्वं तस्य नाम आसीत् कमलनयनः। अद्वैतवेदान्ती मधुसूदनसरस्वती अद्वैतसिद्धिः, अद्वैतरत्नरक्षणम्, भक्तिरसायनम् इत्यादीनि ग्रन्थानि रचयित्वा वैष्णवसाहित्यं तथा संस्कृतसाहित्यं समृद्धमकरोत्। परं कृष्णकुतूहलमिति नाटकं तस्य कीर्तिकेतुं वहति। नाटकस्यास्य राधाकृष्णयोरपार्थिवलीलास्वादनेन आह्लादिता भवन्ति सहृदयाः।
कृष्णकुतुहलं सप्ताङ्कविशिष्टमेकं नाटकम्। राधाकृष्णयोः चन्द्रावली-कृष्णयोर्गोपिकासु च कृष्णस्य लीलावर्णनेन भक्तिरसस्य प्रतिपादनमेव नाट्यकारस्य मुख्याशयः। नाटकेऽस्मिन् नायकः श्रीकृष्णः, नायिका श्रीराधाः प्रतिनायिका च श्रीचन्द्रावली। श्रीमद्भागवत्-पद्मपुराणात्मके अस्मिन्नाटके न केवलं कृष्णस्य कैशोर-यौवनविषयकस्य वर्तमानचरितस्य, अपि तु कंसवधरूपस्य भाविचरितस्य वर्णनमस्ति। एवंविधस्य कृष्णकुतूहलनाटकस्य मधुसूदनसरस्वतीचित्रितस्य श्रीकृष्णचरित्रस्य समीक्षात्मकमध्ययनं शोधप्रबन्धेऽस्मिन् विधीयते।

**कूटशब्दाः –** कृष्णकुतूहलम्, श्रीकृष्णः, मधुसूदनसरस्वती।

## प्रस्तावना

गौडीयवैष्णवसाहित्ये मधुसूदनसरस्वत्या एकं विशिष्टमवदानं वर्तते। प्रख्यातपण्डितो दार्शनिकः परमभक्तः सन्न्यासी श्रीमधुसूदनसरस्वती बांलादेशे फरिदपुरजिलान्तर्गते कोटालिपाडापरगणास्थिते ऊनशिया इति ग्रामे अजायत। परन्तु तस्य कर्मभूमिरासीत् मुक्तिनगरी वाराणसी। ईशवीयः षोडश-सप्तदशशतकः तस्य समयकालः। सर्वतन्त्रपारङ्गमस्य तस्य मातुर्नाम अरुन्धतीदेवी पिता च प्रमोदन-पुरन्दराचार्य-नारायणः। सन्न्यासग्रहणात्पूर्वं तस्य नाम आसीत् कमलनयनः। अद्वैतवेदान्ती मधुसूदनसरस्वती अद्वैतसिद्धिः, परमहंसप्रियाख्यागीताव्याख्या, सिद्धान्तविन्दुः, वेदान्तकल्पलतिका,

गूढार्थदीपिका, प्रस्थानभेदः, अद्वैतरत्नरक्षणम्, भक्तिरसायनम् इत्यादीनि ग्रन्थानि रचयित्वा वैष्णवसाहित्यं तथा संस्कृतसाहित्यं समृद्धमकरोत्। परं कृष्णकुतूहलमिति नाटकं तस्य कीर्तिकेतुं वहति। नाटकस्यास्य राधाकृष्णयोरपार्थिवलीलास्वादनेन आह्लादिता भवन्ति सहृदयाः।

कृष्णकुतुहलं सप्ताङ्कविशिष्टमेकं नाटकम्। राधाकृष्णयोः चन्द्रावली-कृष्णयोर्गोपिकासु च कृष्णस्य लीलावर्णनेन भक्तिरसस्य प्रतिपादनमेव नाट्यकारस्य मुख्याशयः। नाटकेऽस्मिन् नायकः श्रीकृष्णः, नायिका श्रीराधाः प्रतिनायिका च श्रीचन्द्रावली। अत्र गोप्यः, चन्द्रावली राधा च श्रीकृष्णं प्रति अनुरक्ता। श्रीकृष्णेऽपि ताः प्रति अनुरूपं प्रेम परिलक्ष्यते। किन्तु राधां प्रति तत् प्रेम समधिकमेव। राधाकृष्णयोः अनुरागः क्रमशो वर्धते। सखीभिः तयोः मिलनं सङ्घटितं भवति, अपि च रासलीलायां राधां समधिकसौभाग्यं प्रदानं करोति। नाटकमिदं विषयवस्तुना तथा काव्यसौन्दर्यविधायकैरुपादानैरपि विशिष्टम्। श्रीमद्भागवत्-पद्मपुराणात्मके अस्मिन्नाटके न केवलं कृष्णस्य कैशोर-यौवनविषयकस्य वर्तमानचरितस्य, अपि तु कंसवधरूपस्य भाविचरितस्य वर्णनमस्ति। एवंविधस्य कृष्णकुतूहलनाटकस्य मधुसूदनसरस्वतीचित्रितस्य श्रीकृष्णचरित्रस्य समीक्षात्मकमध्ययनं शोधप्रबन्धेऽस्मिन् विधीयते।

कृष्णकुतूहलाख्यस्य नाटकस्यास्य घटनाक्रमस्य केन्द्रेऽस्ति श्रीकृष्णः श्रीराधा चेति चरित्रद्वयम्। तौ एव नाटकस्यास्य मुख्यचरित्रौ तथा च नायक-नायिका। नाटकेऽस्मिन् सकलेषु अङ्केषु श्रीकृष्णस्य उपस्थितिः परिलक्षितः। पुरुषचरित्रेषु विदूषकः भद्रमुखः, सुवलप्रवलसखागणः, सदन्तकः, नलकुवरः, वलरामः, नारदः, नन्दः, अक्रूरः प्रमुखः अन्यतमः। नारीचरित्रेषु चन्द्रावली, कमलमाला-मदनदीपिकासख्यः, यशोदा, वनदेवता, कालिन्दी, धात्रेयिका विशेषा।

लोकप्रसिद्धः यदुकुलप्रदीपः श्रीकृष्णः अस्य कृष्णकुतूहलशीर्षकस्य नाटकस्य नायकः। कृष्णकुतूहलम् इति नामकरणात् एव परिज्ञायते यत् श्रीकृष्णः अत्र प्रधानचरित्रम्। कृष्णस्य कुतूहलम् इति षष्ठीतत्पुरुषसमासनिष्पन्नं कृष्णकुतूहलं पदम्। कुतू-हल्-अच्, क्लीवलिङ्गे प्रथमायाः एकवचने कुतूहलं पदं जातम्। बांलाविश्वकोशे कुतूहलं पदं व्याख्यातम् -"कुतूं चर्म्ममयतैलादिपात्रवत् अन्तर्हलति सोत्सुकं करोति।" [1] विश्वनाथमते कुतूहलं नायिकायाः स्वभावजातेषु अष्टादशालङ्कारेषु अन्यतमम्। दर्पणकारानुसारेण कुतूहलं नाम रम्यवस्तुदर्शनाय स्पृहा - "रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम्।" [2] नाटके अस्मिन् सर्वांशेऽस्ति कौतूहलम् औत्सुकं वा। राधाकृष्णविषयकं नाटकमिदं गौडीयवैष्णवसाहित्यस्यान्तर्गतम्। वैष्णवरसशास्त्रस्य चूडामणिस्वरूपे उज्ज्वलनीलमणिः इति ग्रन्थे श्रीरूपगोस्वामिना नायकवैशिष्ट्यमुल्लिखितम्। तदनुसारे नायकं नाम सुरम्यः, मधुरः, सर्वलक्षणसमन्वितः, वलीयान्, नवयौवनविशिष्टः, प्रियम्बदः, वाग्मी, सुपण्डितः, धीरः, विदग्धः, चतुरः, कृतज्ञः, दक्षिणः, गम्भीरः, प्रेमवश्यः, रमणीमोहनः, सुमधुर-सुरशिल्पी, अतुल्यकेलिसौन्दर्यविशिष्टः –

"अयं सुरम्यो मधुरः सर्व्वसल्लक्षणान्वितः।
वलीयान्नवतारुण्यो वावदूकः प्रियम्बदः॥
सुधीः सप्रतिभो धीरो विदग्धश्चतुरः सुखी।
कृतज्ञो दक्षिणः प्रेमवश्यो गम्भीरताम्बुधिः॥
वरीयान् कीर्त्तिमान् नारीमोहनो नित्यनूतनः।
अतुल्यकेलिसौन्दर्यप्रेष्ठवंशीस्वनाङ्कितः॥"[3]

एषाः गुणाः कृष्णकुतूहलनाटके श्रीकृष्णे पूर्णरूपेण विराजमानाः, अतः स एव नायकः। नाट्यकथाप्रसङ्गेण परिज्ञातं भवति यत् श्रीकृष्णः धीरोदात्तः नायकः। उज्ज्वलनीलमणिकारस्य मतानुसारेण धीरोदात्तः नायकः गम्भीरः, विनयी, क्षमाशीलः, दयावान्, सुदृढव्रतः, निरहङ्कारः, गूढगर्वः, आत्मप्रत्ययविशिष्टापराजेयश्च। सकलमाधुर्यगुणाकरः श्रीकृष्णः मधुररसस्य श्रेष्ठालम्बनम्। साहित्यदर्पणकारोक्तदिशापि प्रस्तुतनाटकस्यास्य नायकः श्रीकृष्णः धीरोदात्तदिव्यश्रेण्याः नायकः –

दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥"[4]

वहुविधालौकिककर्मणः कर्ता कृष्णकुतूहलनाटकस्य नायकः श्रीकृष्णचरित्रः श्रीमद्भागवत्-पद्मपुराणगतात् श्रीकृष्णचरित्रात् न भिन्नः। कृष्णस्य पूतनावध-शकटभङ्ग-कालियदमन-गोप्रचारण-रासलीलादयः क्रीडाः भागवतपुराणे आलोचिताः। अरिष्ट-केशि-शङ्खचूडविनाशः, अक्रूडस्य भगवत्स्तुतिः, मल्लयुद्धे चाणूर-मुष्टिकयोः निधनः, कंसवधः प्रभृतयः विषयाः श्रीमद्भागवते दशमे स्कन्धे

[1] वसु नगेन्द्रनाथ. बांला विश्वकोष. चतुर्थखण्ड,१३६५, पृ-२१९

[2] विश्वनाथकविराजः. साहित्यदर्पणम्. दशमसंस्करणम्, कृष्णदास अकादेमी, वाराणसी, २००२, ३.१२४

[3] रूपगोस्वामी. उज्ज्वलनीलमणिः. पुनर्मुद्रण, तारा लाइब्रेरी, कलकाता, २०१४, १.५

[4] विश्वनाथकविराजः. साहित्यदर्पणम्. दशमसंस्करणम्, कृष्णदास अकादेमी, वाराणसी, २००२, ६.९

उल्लिखिताः। मुरलीध्वनिना आकुलीभूतानां गोपरमणीनां कृष्णसमीपे आगमनं भागवतेऽपि वर्णितम् –

> आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कान्तो जवलोलकुण्डलाः॥" [5]

राधा-चन्द्रावल्यादयः कृष्णप्रेयसीगणः, श्रीदाम-सुदामाः सखावृन्दः, वृन्दावन-मथुरा-द्वारकादयः क्रीडास्थलाः पद्मपुराणे कथिताः। नाट्यकारस्य कृष्णसौन्दर्यम्, रासलीलायां जलकेलिः इत्यादीनां विषयाणां वर्णनाः पद्मपुराणप्रभाविताः।

नाटकस्य प्रारम्भांशे सदन्तक-(कंसहितचिन्तकः) नलकुवरयोः(श्रीकृष्णस्य कृपापात्रः) कथोपकथनेन श्रीकृष्णचरित्रस्य चिरन्तनवैशिष्ट्यं प्रतिपादितम्। सः लीलायाः विलासकारी, साधूनाम् आनन्दप्रदायकः, जगतः आराध्यः तथा चरणाश्रितजनानाम् अभयप्रदायकः –

तस्य नामानुरूपमेव कर्म, तत्र प्रमाणं तु श्रुतिः – "नामैवेति किं लोकोत्तरं कर्मापि नामानुरूपमेव श्रुत्यादि सर्वप्रमाणैः। स तावन्न केवलं मादृशामेवोपास्यः किन्नाम समस्तानामेव लोकानाम्।"[6]

जगतोपास्यस्य तस्य श्रीकृष्णस्य पूतनामोक्षः, शकटछद्मदैत्य-झटिकादैत्ययोः दमनम्, कालियदमनम्, ब्रह्मसम्मोहनम्, इद्रजयम्, पर्वतोत्तोलनादयः वाल्यक्रीडाः अत्यन्तचमत्कारप्रदायिकाः। कंसादीनां दुर्जनानां विनाशमपि तेनैव विहितम्। स्वजनानां रक्षणाय आनन्दप्रदानाय च दावानलभक्षणम्, गोप्रचारणम्, सखिभिः सह क्रीडामोदः, गोपवालानां व्रतपूरणम्, प्रेमाकुलीकरणम्, रासलीलादयः आद्यनन्तानन्दजनकाः क्रीडाः तेनैव नित्यं सङ्घटितम्। श्रीकृष्णमाहात्म्यं श्रुत्वा तस्यालौकिकरूपं दृष्ट्वा च कंसहितचिन्तकः सदन्तकोऽपि कृष्णप्रेम्ना वशीभूतः।

श्रीकृष्णः सर्वैश्वर्यस्याधिकारी तथापि स एकान्ततः यशोदानन्दयोः नन्दनः, श्रीदामासुदामानां प्रियसखः, गोपाङ्गनानां काङ्क्षितजनः तथा श्रीराधायाः प्राणनाथः। तृतीयाङ्के कुमारकृष्णस्य विलम्बवशात् माता यशोदा पिता नन्दश्च कातरौ भवतः। तयोः मलिनमुखं दृष्ट्वा कृष्णोऽपि दुःखमनुभवति। अनेन आचरणे कृष्णस्य पुत्रस्वरूपमेव प्रस्फुटितम्।

श्रीदामादिसखागणं विना कृष्णचरित्रं सम्पूर्णं न भवति। अस्मिन् नाटके वृन्दावनस्य शोभादर्शनंम्, गोप्रचारणम्, गोपाङ्गनानां देहसौष्ठववर्णना, कालिन्दीशोभादर्शनम्, नाटकदर्शनादिषु कर्मसु कृष्णस्य सहायः भवति सखावृन्दः। द्वितीयाङ्के गोपवालानां मनोविभ्रमजनकरूपं दृष्ट्वा तेषां वर्णनायां नियोजितं कृष्णम् उत्साहं दत्तवान् सखागणः। श्रीकृष्णं राधामनोभां ज्ञापयित्वा आश्वस्तं कृतवन्तः गोपवालकाः, विरहे सान्त्वनादाताः अपि ते। कृष्णं प्रति प्रतिनायिकायाः चन्द्रावल्याः आसक्तिं ज्ञात्वा यदा राधा मानं कृतवती, तदा मानिन्याः राधायाः मानभञ्जनं भवति सुवलप्रवलाभ्याम्। तालवनगमनम्, हास्यकौतुकोपहासादीनां क्रीडायां सखीनां सहायः प्राणसखः श्रीकृष्णः। सखायः यदा यदा विपदः सम्मुखीनं भवन्ति सर्वदा कृष्णः त्राणकर्तुः भूमिकायाम् अवतीर्णं भवति। भद्रमुखं द्वितीयाङ्के महदुत्पातिकात्, तृतीयाङ्के राधासखीभ्यः, तालवने कंसचरस्य आक्रमणात् तथा षष्ठाङ्के अरिष्टासुराक्रमणात् सखागणम् उद्धृतं कृतवान् श्रीकृष्णः। प्रकारेऽस्मिन् समग्रे नाटके सखावृन्दः श्रीकृष्णश्च परस्परयोः परिपूरकः।

श्रीकृष्णः भुवनमनोहरः। तस्य रूपेण आकृष्टं भवन्ति राधा, चन्द्रावली गोपवालाश्च। सम्पूर्णे नाटके श्रीकृष्णस्य वाग्मीतायाः परिचयं परिदृश्यते, विशेषतः गोपीनां रूपवर्णनायाम्। तस्य शास्त्रज्ञानमपि उल्लेखनीयम्। द्वितीयाङ्के चन्द्रावल्या सह सांख्यदर्शनस्य अन्यतमं तत्त्वं प्रकृत्याः तुलनां कृतवान् सः। यथा – "केयं सकलगुणालङ्कृता मूलप्रकृतिरिव प्रधानपदाभिधेया पुरतो राजते?"[7]

चातुर्यमपि तस्य चरित्रस्य अन्यतमं वैशिष्ट्यम्। चतुर्थाङ्के चन्द्रावलीकुञ्जे चन्द्रावल्या सह हास्यपरिहासे लिप्तोऽपि सन् चातुर्येण सह सुवल-प्रवलौ चन्द्रावली-कृष्णयोः वेशं धृत्वा राधासमीपे उपस्थापयामास श्रीकृष्णः। चन्द्रावल्या सह वर्षासुषमावर्णनायां तस्य वर्णनानैपुण्यं प्रतिफलितम्। विनयमपि कृष्णचरित्रस्य उल्लेखयोग्यं वैशिष्ट्यम्। चतुर्थाङ्के वलरामः कृष्णस्य गुणकीर्त्तनं कृतवान्। षष्ठाङ्के यदा नारदः श्रीकृष्णस्य पदप्रान्ते पतति तदा कृष्णस्य विनयं प्रकाशितम् –"प्रभो कृपासम्बलितावलोकितशुभानुध्यानसम्बर्द्धनीयेषु जनेषु किमर्थमिदमसमञ्जसमाचरसि।" [8] औदार्यमपि तस्य श्रीकृष्णस्य चारित्रिकं वैशिष्ट्यम्। कंसचराण् विनष्टं कृतवान् परन्तु कृतित्वग्रहणे सः कृष्णः अस्वीकरोति। यथा अरिष्टासुरस्य मृत्योः कारणं तस्य पापम्, नारदस्य रोषपूर्णदृष्टिरेव केशिविनाशस्य हेतुः। पुनः सप्तमाङ्के

---

5 श्रीमद्भागवतमहापुराणम्. द्वितीयसंस्करणम्, गीता प्रेस, गोरखपुर,१९९९, १०.२९.४

6 मधुसूदनसरस्वती. कृष्णकुतूहलम्. प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९०, पृ-१०

7 मधुसूदनसरस्वती. कृष्णकुतूहलम्. प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९०, पृ-२८

8 मधुसूदनसरस्वती. कृष्णकुतूहलम्. प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९०, पृ-१०४

नारदप्रणीतं गर्भनाटकं दृष्ट्वा प्रीत्वा च नाटकस्य कुशीलवानां नाट्यकारनारदस्य च अभीष्टं प्रदत्तवान्। श्रीकृष्णानुग्रहे एव गन्धर्वसुदर्शनः शापात् मुक्तिं लब्धवान्। श्रीकृष्णः सुदक्षः मल्लयोद्धापि, मल्लयुद्धेनैव चाणूरं हन्ति। सुमधुरसुरसृष्टौ तस्य दक्षता प्रश्नातीता। तस्य मुरलाध्वनेः माहात्म्यं वर्णयन्ति राधासख्यः –

पीयूषं विषयन् विषं च सुधयन् निर्जीवितं जीवयन्
सञ्जातः कुलजायशोद्रिकुलिशः कोऽप्येष वंशीस्वनः॥"[9]

एषा वंशीध्वनिः कर्णपथमाध्यमेन हृदयं प्रविष्ट्वा गोपरमणीः आकुलीकरोति, तेऽपि कुलं, मानं, यशं, पतिप्रेमानं सर्वं तुच्छं कृत्वा उपस्थिताः जाताः कृष्णसम्मुखे। एतानि सर्वाणि चारित्रिकवैशिष्ट्यानि अतिक्रमं करोति कृष्णस्य प्रेमिकस्वरूपः। द्वितीयाङ्के वृन्दावनशोभादर्शनावसरे अनङ्गसेना-कमलमाला-चम्पककलिका-कामाङ्कुराप्रमुखाः गोपवालाः प्रति आसक्तः सस्पृहः कृष्णः तेषां नामानाम् अन्वयार्थौ विचारपूर्वकं वर्णयति –

"यत्पत्युपचितलक्ष्मीरथगजलीलातुरङ्गसम्पत्तिः।

तथा च कमलमालायाः अपि वर्णनं कृतं तेन –

"चरणौ कमले कमले च करौ युगलं कुचयोरपि तन्मुकुले।
वदनं कमलं नयने कमले सुतनोः कमलान्यखिलैव तनुः॥"[10]

गोपीगणापि कृष्णप्रेमनि उन्मत्ताः। श्रीकृष्णं पतित्वेन प्राप्तुं ते कात्यायणीपूजां कुर्वन्ति। कृष्णदर्शनमपि येषां समीपे परमसौभाग्यं ताः गोपवनिताः कृष्णकृपालाभे न वञ्चिताः। मुरलीध्वन्या आह्वानं कृत्वा रासलीलायां ताः परमानन्दं ददाति, कालेऽस्मिन् वाधास्वरूपं भद्रमुखं गृहे प्रेरणेऽपि श्रीकृष्णः अकुण्ठितः। चन्द्रं तिरस्कर्तुं समर्था यस्याः वदनचन्द्रिका तां चन्द्रावलीं दृष्टा श्रीकृष्णः तां प्रति आकृष्टं भवति अपि च एतावत् पर्यन्तं तस्याः अदर्शनाय आक्षेपयति –

"व्यामोहयति भुजङ्गानङ्गीकुरुते महत्तमं ज्योतिः।
अतनुविषज्वरहरणी रमणी किमियं महामणिश्रेणी॥"[11]

श्रीकृष्णदर्शनमात्रे चन्द्रावली अपि मोहिता जाता। अनङ्गसेनादीनां गोपीनामपेक्षया चन्द्रावलीं प्रति श्रीकृष्णस्य प्रेमासीत् समधिकमेव। सः चन्द्रावलीकुञ्जे चन्द्रावल्या सह सहास्यपरिहासं वर्षासुषमां पश्यति। चन्द्रावल्याः कोपप्रशमनाय स्वं दासरूपेण उल्लिखितम्, तस्याः पदाघातं प्रार्थितं तथा निःसङ्कोचेन चन्द्रावलीचरणतले पतितम्। अपि च कन्दर्पहर्षस्वरूपां श्रीराधां दृष्ट्वा तामपि वर्णितं तेन श्रीकृष्णेन –

"कराङ्घ्रिमुखलोचनं नयनरञ्जनं नीरजैर्वपुः प्रकृतिसुन्दरं कनकचम्पकैः कल्पितम्।
स्तनद्वयमनुत्तमं स्तवकसम्पदा स्वस्तरोर्धनं कुसुमधन्वनस्तादिह राधिकैवाधिकम्॥"[12]

कृष्णहृदयः व्याकुलं भवति राधाहृदयसंवादनिमित्ताय। हृदयाद् आरभ्य अपरहृदये यद् समाप्तं भवति तदेव प्रेम। हृदयानन्दप्रदायिन्याः राधिकायाः विरहवशात् श्रीकृष्णः प्राणधारणे अक्षमः। प्रियतमायाः मनोभावं ज्ञात्वा आश्वस्तः जातः सः। क्षणमात्रविरहोऽपि परस्परयोः समीपे असहनीया प्रतिभाता। रासलीलायां श्रीकृष्णः प्राणधिकप्रियां ददाति सर्वाधिकसौभाग्यम्। अतः एकाधिके प्रियायां आसक्तः सन् अपि माधवः एकान्ततः राधायाः, श्रीराधिकायां निवेदितः। राधाकृष्णयोर्मधुरलीला यद्यपि संस्कृतसाहित्ये तथा भारतीयजनमानसे सुप्रसिद्धा तथापि नाट्यकारः मधुसूदनसरस्वती तस्य अपूर्ववस्तुनिर्माणक्षमाप्रतिभया तामभिनवरूपेणैव उपस्थापितवान्, यः न्यूनमाकर्षयति सहृदयचित्तम्। सन्न्यासी परमहंसपरिव्राजकाचार्यः परमभक्तः सन् अपि स्वनाटके अपार्थिवां कृष्णलीलां ग्रथयित्वा सहृदयहृदये स्फुटयति कृष्णप्रेम। अतः कृष्णकुतूहलनाटके श्रीकृष्णः मूलतः नाट्यकारस्य स्वस्य कवित्वशक्तिना निर्मितः।

## ग्रन्थपञ्जी

1. कृष्णकुतूहलम् – लेखकः मधुसूदनसरस्वती, सम्पादकः हरिशङ्करओझा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्, १९९०।

[9] मधुसूदनसरस्वती. कृष्णकुतूहलम्. प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९०, ३.३७

[10] मधुसूदनसरस्वती. कृष्णकुतूहलम्. प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९०, २.११

[11] मधुसूदनसरस्वती. कृष्णकुतूहलम्. प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९०, २.२५

[12] मधुसूदनसरस्वती. कृष्णकुतूहलम्. प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९०, २.२८

2. उज्ज्वलनीलमणिः – लेखकः रूपगोस्वामी, सम्पादकः रामनारायण विद्यारत्न, कलकाता, पुनर्मुद्रणम्, २०१४।
3. साहित्यदर्पणम् – लेखकः विश्वनाथकविराजः, सम्पादक विमलाकान्त मुखोपाध्याय, संस्कृतपुस्तकभाण्डार, कलकाता, २०१३।
4. साहित्यदर्पणम् – लेखकः विश्वनाथकविराजः, सम्पादकः शेषराजशर्मा रेग्मी, कृष्णदास अकादेमी, वाराणसी, दशमसंस्करणम्, २००२।
5. रस ओ भाव – लेखकः अशोकनाथ शास्त्री, संस्कृतपुस्तकभाण्डार, कलकाता, प्रथम प्रकाश, १४०५ वङ्गाव्द।
6. श्रीमद्भागवत्महापुराणम् – गीताप्रेस, गोरखपुर, द्वितीयसंस्करणम्, १९९९ सम्बत्।
7. पद्मपुराणम्(द्वितीयभागः) – सम्पादकः विश्वनाथनारायणः, प्रकाशकः महादेव चिमणाजी आपटे, पुणा, १८९४।
8. बांला विश्वकोश – लेखकः नगेन्द्रनाथ वसु, कलकाता, १३६५।